# 2023

## M.A.

## 4th Semester Examination

## SANSKRIT

## PAPER : SAN-401A & 401B

*Full Marks* : 40

*Time* : 2 hours

*The figures in the right-hand margin indicate marks.*

*Candidates are required to give their answers in their own words as far as practicable.*

*Illustrate the answers wherever necessary.*

Answer from *any* **one** Group.

### GROUP—A

### ( LITERATURE )

Answer **all** questions.

( सर्वे प्रश्नाः संस्कृतभाषया देवनागरीलिप्या च समाधेयाः )

1. प्रश्नद्वयं समाधेयम् : 2×2=4

(क) रसगङ्गाधरग्रन्थस्य मङ्गलश्लोके कस्य स्तुतिर्विहिता? स केन तुलितः?

(ख) जगन्नाथमते का नाम प्रतिभा?

(ग) पण्डित राजानुसारम् अधमाधममपि पञ्चमं भवितुमर्हति न वा? कथं वा?

**2.** सप्रसङ्ग **द्वयोर्व्याख्या** कार्या : 4×2=8

(क) प्रतिभात्वञ्च कवितायाः कारणतावच्छेदकम्।

(ख) यत्र व्यङ्ग्यमप्रधानमेव सच्चमत्कारकारणं तद्द्वितीयम्।

(ग) यत्तु 'रसवदेव काव्यम्' इति साहित्यदर्पणे निर्णीतं, तन्न।

**3.** **एकः** समाधेयः : 8×1=8

(क) जगन्नाथसम्मतं काव्यलक्षणं प्रतिपद–व्यावृत्तिपुरः सरं व्याख्यायताम्।

(ख) जगन्नाथमते काव्यं कतिविधम्? कानि च तानि? तेषु प्रथमकाव्यस्वरूपं सोदाहरणम् आलोच्यताम्।

**4.** **यथेच्छं प्रश्नद्वयं** समाधेयम् : 2×2=4

(क) उत्पत्तिवादस्य प्रवक्ता कः? तन्मते विभावैः सह स्थायिभावस्य कः सम्बन्धः?

(ख) विप्रलम्भशृङ्गारः कतिविधः? केच ते?

(ग) रसादि कदा अलङ्कार्यो भवति? कदा च अलङ्कारो भवति?

**5.** सप्रसंङ्ग **द्वयोर्व्याख्या** कार्या : 4×2=8

(क) व्यक्तः स तैर्विभावाद्यैः स्थायी भावो रसः स्मृतः।

(ख) रतिर्देवादिविषया व्यभिचारी तथाऽञ्जितः।

(ग) ध्वनेस्त्रयो भेदाः व्यङ्ग्यस्य त्रिरूपत्वात्।

**6.** **एकः** समाधेय : 8×1=8

(क) भरतमुनेः रससूत्रं किम्? अभिनवगुप्तदिशा सूत्रमिदं व्याख्यायताम्।

(ख) गुणीभूतव्यङ्ग्यं कतिविधम्? कानि च तानि? तेषु द्वितीयः प्रभेदः सोदाहरणमालोच्यताम्।

## GROUP—B

## ( PHILOSOPHY )

Answer **all** questions.

**( सर्वे प्रश्नाः संस्कृतभाषया देवनागरीलिप्या च समाधेयाः )**

**1.** यथेच्छं **चत्वारः** प्रश्नाः समाधेयाः : 2×4=8

(क) किमालयविज्ञानम्?

(ख) पञ्चकारणीत्यनेन केषां ग्रहणम्?

(ग) क्षणिकत्ववादप्रतिष्ठायां बौद्धैः कीदृशं प्रमाणं स्वीकृतम्? तत्र प्रमाणे कः पक्षः, कः साध्यः, कश्च हेतुः, उदाहरणं वा किम्?

(घ) चार्वाकमते पुरुषार्थः कतिविधः?

(ङ) चार्वाकमते कति भूतानि? कानि च तानि? पञ्चमभूतं कथं न स्वीकृतम्?

(च) जैनदर्शनानुसारं सम्यग्दर्शनमित्यनेन किं बोध्यते?

**2.** यथेच्छं **चतुर्णां** टीका लेख्या : 4×4=16

(क) लोकायतम्

(ख) व्याघातपुनरुक्तदोषौ

(ग) भावनाचतुष्टयम्

(घ) कुर्वद्रूपत्वम्

(ङ) स्याद्वादः

(च) कृतप्रणाशाकृताभ्यागमः

**3.** यथानिर्देश समाधेयम् : 8×2=16

(क) चार्वाकसम्मतः देहात्मवादः सयुक्ति प्रतिपाद्यताम्।

( अथवा )

अर्हतः सार्वज्ञ्यसिद्धौ जैनानां युक्तय आलोच्यन्ताम्।

(ख) ''यदभ्यध्यायि अविनाभावो दुर्बोध इति तदसाधीयः'' – अत्र कैः किम् अभ्यध्यायि? तत् कथम् असाधीयमिति सयुक्ति आलोच्यताम्।

( अथवा )

सामान्यनिराकरणे बौद्धानां युक्तय आलोच्यन्ताम्।

★ ★ ★